# संस्कृत

## द्वितीय प्रश्न-पत्र ( काव्यम् अर्थावबोधः व्याकरणं निबन्धश्च )

**Time allowed : Three hours** | **Maximum Marks : 100**

1. अधोलिखितेषु कयोश्चित् द्वयोः श्लोकयोः सप्रसङ्ग अन्वयः सटिप्पणी व्याख्या कार्या-

(क) अभियुक्तं बलवता दुर्बलं हीनसाधनम्।
हृतस्वं कामिनं चोरमाविशन्ति प्रजागराः।।

(ख) द्वाविमौ कण्टकौ तीक्ष्णौ शरीरपरिशोषिणौ।
यश्चाधनः कामयते यश्च कुप्यत्यनीश्वरः।।

questionpaperesult.com

Scanned by CamScanner

(ग) अनुबन्धानपेक्षेत सानुबन्धेषु कर्मसु।
सम्प्रधार्य च कुर्वीत न वेगेन समाचरेत्।।

(घ) रथ: शरीरं पुरुषस्य राज-
न्नात्मा नियन्तेन्द्रियाण्यस्य चाश्वा:।
तैरप्रमत: कुशली सदश्वै-
दान्तै: सुखं याति रथीव धीर:।।

2. अधोलिखितेषु प्रश्नेषु केषाञ्चित् चतुर्णां प्रश्नानामुत्तराणि देयानि-

(क) पुरुषेण हातव्या: दोषा: के सन्ति? (ख) एक: कान् न चिन्तयेत्?
(ग) जीवलोकस्य षड् सुखानि कानि सन्ति? (घ) मूढचेता नराधम: क भवति?
(ङ) धर्मेण किं विन्देत्? (च) नरकस्यत्रिविधं द्वारं किमस्ति?
(छ) मन्त्रविप्लवं कान्ति हन्ति? (ज) राज्ञां बलं किमस्ति?

3. निम्नलिखितेषु कयोश्चित् द्वयो: श्लोकयो: ससन्दर्भप्रसङ्गन्वय टिप्पण्यादि सहितं व्याख्या कार्या-

(क) कृतप्रणामस्य महीं महीभुजे, जितां सपत्नेन निवेदयिष्यत:।
न विव्यथे तस्य मनो न हि प्रियं, प्रवक्तुमिच्छ मृषा हितेषिण:।।

(ख) प्रलीन भूपालमपि स्थिरायति, प्रशासदावारिधि मण्डलं भुव:।
सचिन्तयत्येव मियस्त्वदेष्यती-रहो दुरन्ता बलवद् विरोधिता।।

(ग) सुखेन लभ्या दधत: कृषीवलै:, रकृष्ट पच्या इव सस्य सम्पद:।
वितन्वति क्षेममदेवमातृका-श्चिराय तस्मिन् कुरवश्चकासति।।

(घ) पुरोपनीतं नृप रामणीयकं, द्विजातिशेषेण यदेतदन्धसा।
तदद्य से वन्यफलाशिन: परं परैतिकार्श्यं यशसा समं वपु:।।

4. केषाञ्चित् चतुर्णां प्रश्नानामुत्तराणि देयानि-

(क) पराभव: अपि उत्सव: केषां भवति?
(ख) किरातार्जुनीयं महाकाव्यस्य नायक: क: अस्ति?
(ग) किरातार्जुनीयं महाकाव्यस्य प्रथमसर्गारम्भ: केन शब्देन भवति?
(घ) भूपतीनां चरितं कीदृशं भवति? (ङ) कै: समं विरोध: वरं भवति?
(च) वृकोदर: क: आसीत्? (छ) गुप्तचराणां गिर: कीदृशी भवति?
(ज) पराभवं के व्रजन्ति?

5. निम्नलिखितेषु कयोश्चिद् द्वयो: श्लोकयो: प्रसङ्गन्वय टिप्पण्यादि सहितं व्याख्या कार्या-

(क) अम्भोजिनीवन विहार विलासमेव, हंसस्य हन्ति नितरां कुपितो विधाता।
नत्वस्य दुग्ध जलभेद विधौ प्रसिद्ध, वैदग्ध्य कीर्तिमपहर्तुमसौ समर्थ:।।

(ख) तानीन्द्रियाण्यविकलानि तदेवनाम्, सा बुद्धिर प्रतिहता वचनं तदेव।
अर्थोष्मणा विरहित: पुरुष स एव, त्वन्य: क्षणेन भवतीति विधित्रमेतत्।।

(ग) य: प्रीणयेत्सुचरितै: पितरं पुत्रो, यद् भर्तुरेव हितमिच्छति तत्कलत्रम्।
तन्मित्रमापहि सुखे च समक्रियं य-देतत्त्रयं जगति पुण्यकृतो लभन्ते।।

(घ) किं तेन हेमगिरिणा रजताद्रिणा वा,यत्राश्रिता ितरवस्तरवस्त एव।
मन्यामहे मलयमेव, यदाश्रयेण, कङ्कोलनिम्बकुटजा अपि चन्दना स्यु:।।

6. अधोलिखितेषु प्रश्नेषु केषाञ्चित् चतुर्णां प्रश्नानामुत्तराणि देयानि-

(क) केन विना सर्वगुणा: तृणतुल्या: भवन्ति?
(ख) वित्तस्य कतिगतय: भवन्ति? (ग) उत्तमजना: कं न परित्यजन्ति?

questionpaperesult.com

Scanned by CamScanner

(घ) परोपकारिणां स्वभावः कीदृशः भवति ?(ङ)प्रच्छन्नं गुप्तं धनं किं भवति ?
(च)ब्रह्माऽपि कं नरं न रञ्जयति ? (छ) अपण्डितानां विभूषणं कं भवति ?
(ज) शतमुखः विनिपातः केषां भवति ?

7. अधोलिखितेषु विशयेषु कमप्येकं विषयमवलम्ब्य संस्कृत भाषायां निबन्धः लेखनीय-
(क)पर्यावरणसंरक्षणम्। (ख)आधुनिकेयुगे संस्कृत भाषायाः महत्त्वम्।
(ग) सदाचार महत्त्वम्। (घ) परोपकाराय सतां विभूतयः।

8. निम्नलिखित गद्यांश पठित्वा प्रश्नानमुत्तराणि संस्कृत भाषायां देयानि-
सतां सज्जनानां संगति सत्संगतिः कथ्यते। ये सज्जनाः साधवः पवित्रात्मनाः सन्ति, तेषां संगत्या मनुष्यः सज्जनः साधुः शिष्टश्च भवति। ये दुर्जना सन्ति तेषां संगत्या मनुष्यो दुर्जनो भवति। पतनं विनाशं च प्राप्नोति। ये सज्जनैः सह उपविशन्ति उत्तिष्ठन्ति खादन्ति पिबन्ति च ते तथैव स्वभावं धारयन्ति। मानवोपरि संगतेः महान् प्रभावः भवति। यादृशैः पुरुषैः सह स निवसति, तादृश एवं स भवति। अत एवोच्यते-
संसर्गजा दोष गुणाः भवन्ति।।1।।
हीयते हि मतिस्तात, हीनैः सह समागमात्।।2।।
सज्जनानां संगत्या मानवः उन्नतिं प्राप्नोति। तस्य विद्या कीर्तिश्च वर्धेते। अत एव स्वयशो-वृद्धये ज्ञानवृद्धये सुखस्य शान्तेश्च प्राप्तये सर्वैरपि सर्वदा सत्संगति करणीया। दुर्जनसंगति च हेया। सत्संगति माहात्म्ये एवं उच्वते।
जाड्यंधियो हरति सिञ्चति वाचिसत्यम्, मानोन्नति दिशति पापमपाकरोति।
चेतः प्रसादयति दिक्षु तनोति कीर्तिम्, सत्संगति कथय किं न करोतिपुंसाम्।।
(अ)उपर्युक्त गद्यांशस्य शीर्षक देयम्।
(ब) अधोलिखितानां प्रश्नानामुत्तराणि संस्कृत भाषायां देयानि-
(1) सत्संगत्या जनः कीदृशः भवति ? (2) संसर्गजा के भवन्ति ?
(3) मतिः कदा हीयते ? (4) सत्संगति पुंसां किं करोति ?
(5) वाचिसत्यं का सिञ्चति ?
(स) अस्य गद्यांशय संस्कृत भाषायां संक्षिप्तिकरणं क्रियताम्।

9. निम्नलिखितेषु सूत्रेषु कयोश्चिद् द्वयोः सूत्रयोः सोदाहरणं व्याख्याकार्या-
(क)झोऽन्तः (ख)आतोङितः
(ग) जुहोत्यादिभ्यः श्लुः (घ) एरुः

10. अधोलिखितेषु पदेषु केषाञ्चित् पञ्चपदानां सुत्रोल्लेखपूर्वकं रूप सिद्धिः कार्या-
(क)भवति (ख) भविष्यति (ग) एधन्ते (घ) अत्ति
(ङ)जुह्वति (च) दीव्यति (छ) चोरयति (ज) तनोति
(झ) क्रीणन्ति (ञ) सुनोति

questionpaperesult.com

Scanned by CamScanner